नirvाणमञ्जरि

# નિર્વાણમઞ્જરિ

અહં નામરો નૈવ મર્ત્યો ન દૈત્યો
    ન ગન્ધર્વયક્ષઃ પિશાચપ્રભેદઃ .
પુમાન્નૈવ ન સ્ત્રી તથા નૈવ ષણ્ડઃ
    પ્રકૃષ્ટઃ પ્રકાશસ્વરૂપઃ શિવોઽહમ્ .. ૧..
અહં નૈવ બાલો યુવા નૈવ વૃદ્ધો
    ન વર્ણી ન ચ બ્રહ્મચારી ગૃહસ્થઃ .
વનસ્થોઽપિ નાહં ન સંન્યસ્તધર્મા
    જગજ્જન્મનાશૈકહેતુઃ શિવોઽહમ્ .. ૩..
અહં નૈવ મેયસ્તિરોભૂતમાયા
    તથૈવેક્ષિતું માં પૃથઙ્નાસ્ત્યુપાયઃ .
સમાશ્લિષ્ટકાયત્રયોઽપ્યદ્વિતીયઃ
    સદાતીન્દ્રિયઃ સર્વરૂપઃ શિવોઽહમ્ .. ૩..
અહં નૈવ મન્તા ન ગન્તા ન વક્તા
    ન કર્તા ન ભોક્તા ન મુક્તાશ્રમસ્થઃ .
યથાહં મનોવૃત્તિભેદસ્વરૂપ-
    સ્તથા સર્વવૃત્તિપ્રદીપઃ શિવોઽહમ્ .. ૪..
ન મે લોકયાત્રાપ્રવાહપ્રવૃત્તિ-
    ર્ન મે બન્ધબુદ્ધ્યા દુરીહાનિવૃત્તિઃ .
પ્રવૃત્તિર્નિવૃત્ત્યાસ્ય ચિત્તસ્ય વૃત્તિ-
    ર્યતસ્ત્વહં તત્સ્વરૂપઃ શિવોઽહમ્ .. ૫..
નિદાનં યદજ્ઞાનકાર્યસ્ય કાર્યં
    વિના યસ્ય સત્ત્વં સ્વતો નૈવ ભાતિ .
યદાદ્યન્તમધ્યાન્તરાલાન્તરાલ-
    પ્રકાશાત્મકં સ્યાત્તદેવાહમસ્મિ .. ૬..
યતોઽહં ન બુદ્ધિર્ન મે કાર્યસિદ્ધિ-

ર્યતો નાહમઙ્ગં ન મે લિઙ્ગભઙ્ગમ્ .
હૃદાકાશવર્તી ગતાઙ્ગત્રયાર્તિઃ
સદા સચ્ચિદાનન્દમૂર્તિઃ શિવોઽહમ્ .. ૭..
યદાસીદ્વિલાસાદ્વિકારં જગદ્ય-
દ્વિકરાશ્રયં નાદ્વિતીયત્વતઃ સ્યાત્ .
મનોબુદ્ધિચિત્તાહમાકારવૃત્તિ-
પ્રવૃત્તિર્યતઃ સ્યાત્તદેવાહમસ્મિ .. ૮..
યદન્તર્બહિર્વ્યાપકં નિત્યશુદ્ધં
યદેકં સદા સચ્ચિદાનન્દકન્દમ્ .
યતઃ સ્થૂલસૂક્ષ્મપ્રપચસ્ય ભાનં
યતસ્તત્પ્રસૂતિસ્તદેવાહમસ્મિ .. ૯..
યદર્કેન્દુવિદ્યુત્પ્રભાજાલમાલા-
વિલાસાસ્પદં યત્સ્વભેદાદિશૂન્યમ્ .
સમસ્તં જગદ્યસ્ય પાદાત્મકં સ્યા-
દ્યતઃ શક્તિભાનં તદેવાહમસ્મિ .. ૧૦..
યતઃ કાલમૃત્યુર્બિભેતિ પ્રકામં
યતશ્ચિત્તબુદ્ધીન્દ્રિયાણાં વિલાસઃ .
હરિબ્રહ્મરુદ્રેન્દ્રચન્દ્રાદિનામ-
પ્રકાશો યતઃ સ્યાત્તદેવાહમસ્મિ .. ૧૧..
યદાકાશવત્સર્વગં શાન્તરૂપં
પરં જ્યોતિરાકારશૂન્યં વરેણ્યમ્ .
યદાદ્યન્તશૂન્યં પરં શઙ્કરાખ્યં
યદન્તર્વિભાવ્યં તદેવાહમસ્મિ .. ૧૨..
ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવત્પાદ કૃતૌ

નિર્વાણમજરી સંપૂર્ણા ..